# Shrimad Ananda Nataraja AshTottarashatanama Stotram

# શ્રીમદાનન્દનટરાજાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shrimad Ananda Nataraja AshTottarashatanama Stotram

File name : AnandanaTarAjAShTottarashatanAmastotram.itx

Category : shiva, aShTottarashatanAma

Location : doc_shiva

Transliterated by : NA

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : See corresponding nAmAvalI

Latest update : May 9, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

# શ્રીમદાનન્દનટરાજાષ્ટોત્તરશતનામસ્તોત્રમ્

ચિદમ્બરેશ્વરઃ શમ્ભુઃ નટેશો નટનપ્રિયઃ ।
અપસ્મારહરો હંસો નૃત્તરાજઃ સભાપતિઃ ॥ ૧॥

પુણ્ડરીકપુરાધીશઃ શ્રીમદ્ધેમસભેશ્વરઃ ।
શિવશ્ચિદમ્બરમનુર્મન્ત્રમૂર્તિહરિપ્રિયઃ ॥ ૨॥

દ્વાદશાન્તસ્થિતો નૃત્તો નૃત્તમૂર્તિઃ પરાત્પરઃ ।
પરાનન્દઃ પરઞ્જ્યોતિઃ આનન્દો વિબુધેશ્વરઃ ॥ ૩॥

પરપ્રકાશો નૃત્તાઙ્ગો નૃત્તપાદસ્ત્રિલોચનઃ ।
વ્યાઘ્રપાદપ્રિયો મન્ત્રરાજસ્તિલ્વવનેશ્વરઃ ॥ ૪॥

હરો રત્નસભાનાથઃ પતઞ્જલિવરપ્રદઃ ।
મન્ત્રવિગ્રહ ઓઙ્કારઃ શઙ્કરશ્ચન્દ્રશેખરઃ ॥ ૫॥

નીલકણ્ઠો લલાટાક્ષો વહ્નિહસ્તો મહેશ્વરઃ ।
આનન્દતાણ્ડવઃ શ્વેતો ગઙ્ગાધરો જટાધરઃ ॥ ૬॥

ચક્રેશઃ કુઞ્ચિતપદઃ શ્રીચક્રાઙ્ગોઽભયપ્રદઃ ।
મણિનૂપુરપાદાબ્જઃ ત્રિપુરાવલ્લભેશ્વરઃ ॥ ૭॥

બીજહસ્તઃ ચક્રનાથો બિન્દુત્રૈકોણવાસકઃ ।
પાઞ્ચભૌતિકદેહાઙ્ગઃ પરમાનન્દતાણ્ડવઃ ॥ ૮॥

ભુજઙ્ગભૂષણઃ પઞ્ચદશાક્ષરમનોહરઃ ।
વિશ્વેશ્વરો વિરૂપાક્ષો વિશ્વાતીતો જગદ્ગુરુઃ ॥ ૯॥

ત્રિચત્વારિંશત્કોણાઙ્ગઃ પ્રભાચક્રેશ્વરઃ પ્રભુઃ ।
નવાવરણચક્રેશો નવચક્રેશ્વરીપ્રિયઃ ॥ ૧૦॥

નાટ્યેશ્વરઃ સભાનાથઃ સિંહવર્મપ્રપૂજિતઃ ।
વ્યાઘ્રચર્મામ્બરધરોભીમઃ હ્રીં(ક્લીં)ઙ્કારનાયકઃ ॥ ૧૧॥

હ્રીં(ઐં) કારરુદ્રસ્ત્રિશિવસ્તત્ત્વાતીતો નિરઞ્જનઃ ।
રામોઽનન્તસ્તત્ત્વમૂર્તિઃ રુદ્રઃ કાલાન્તકોઽવ્યયઃ ॥ ૧૨॥

ક્ષ્મ્ર્યૂઙ્કાર શમ્ભુરવ્યક્તઃ ત્રિગુણશ્ચિત્પ્રકાશકઃ ।
સૌઙ્કારસોમસ્તત્વજ્ઞોઽઘોરો દક્ષાધ્વરાન્તકઃ ॥ ૧૩॥

કામારિર્ગજસંહર્તા વીરભદ્રઃ સદાશિવઃ ।
ભિક્ષાટનઃ કૃષ્ણગન્ધપ્રિયઃ કઙ્કાલભૈરવઃ ॥ ૧૪॥

નૃસિંહગર્વહરણો ભદ્રકાલીમદાન્તકઃ ।
નિર્વિકલ્પો નિરાકારો નિર્મલાઙ્ગો નિરામયઃ ॥ ૧૫॥

બ્રહ્મવિષ્ણુપ્રિયઃ આનન્દનટેશો ભક્તવત્સલઃ ।
શ્રીમદ્દભ્રસભાનાથઃ શિવકામીમનોહરઃ ॥ ૧૬॥

શ્રીમદાનન્દનટરાજસ્યાષ્ટોત્તરં શતમ્ ।
નામ્નાં સઙ્કીર્તયેત્ નિત્યં સર્વપાપપ્રણાશકમ્ ॥ ૧૭॥

પુત્રપૌત્રપ્રદં વંશવૃદ્ધિદં વિષનાશનમ્ ।
આયુષ્કરં વ્યાધિહરં સર્વસમ્પત્પ્રદાયકમ્ ॥ ૧૮॥

સર્વમઙ્ગલસંપ્રાપ્તિઃ જાયતે તસ્ય હિ ધ્રુવમ્ ।

ઇતિ શ્રીમદાનન્દનટરાજાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shrimad Ananda Nataraja AshTottarashatanama Stotram*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*